# आत्मबोधः

# ātmabodhaḥ

तपोभिः क्षीण-पापानां
शान्तानां वीतरागिणाम् ।
मुमुक्षूणामपेक्ष्योऽयम्
आत्मबोधो विधीयते ॥ १ ॥

tapobhiḥ kṣīṇa-pāpānāṁ
śāntānāṁ vīta-rāgiṇām |
mumukṣūṇām-apekṣyo'yam
ātmabodho vidhīyate || 1 ||

बोधोऽन्यसाधनेभ्यो हि
साक्षान्मोक्षैकसाधनम् ।
पाकस्य वन्हिवज्ज्ञानं
विना मोक्षो न सिध्यति ॥ २ ॥

bodho'nya-sādhanebhyo hi
sākṣān-mokṣaika-sādhanam |
pākasya vanhivaj-jñānaṁ
vinā mokṣo na sidhyati || 2 ||

अविरोधितया कर्म
नाऽविद्यां विनिवर्तयेत् ।
विद्याविद्यां निहन्त्येव
तेजस्तिमिरसङ्घवत् ॥ ३ ॥

avarodhitayā karma
nā'vidyāṁ vinivartayet |
vidyāvidyāṁ nihanty-eva
tejas-timira-saṅghavat || 3 ||

परिच्छिन्न इवाज्ञानात्
तन्नाशे सति केवलः ।
स्वयं प्रकाशते ह्यात्मा
मेघापायेऽशुमानिव ॥ ४ ॥

paricchinna ivājñānāt
tannāśe sati kevalaḥ |
svayaṁ prakāśate hyātmā
meghāpāyeṁ'śumāniva || 4 ||

अज्ञान-कलुषं जीवं
ज्ञानाभ्यासाद्विनिर्मलम् ।
कृत्वा ज्ञानं स्वयं नश्येत्
जलं कतकरेणुवत् ॥ ५ ॥

ajñāna-kaluṣaṁ jīvaṁ
jñānābhyāsādvinirmalam |
kṛtvā jñānaṁ svayaṁ naśyet
jalaṁ katakareṇuvat || 5 ||

संसारः स्वप्नतुल्यो हि
राग-द्वेषादिसङ्कुलः ।
स्वकाले सत्यवद्भाति
प्रबोधे सत्यसद्भवेत् ॥ ६ ॥

saṁsāraḥ svapnatulyo hi
rāga-dveṣādisaṅkulaḥ |
svakāle satyavadbhāti
prabodhe saty-asadbhavet || 6 ||

तावत्सत्यं जगद्भाति
शुक्तिकारजतं यथा ।
यावन्न ज्ञायते ब्रह्म
सर्वाधिष्ठानमद्वयम् ॥ ७ ॥

tāvat-satyaṁ jagadbhāti
śuktikārajataṁ yathā |
yāvanna jñāyate brahma
sarvādhiṣṭhānam-advayam || 7 ||

उपादानेऽखिलाधारे
जगन्ति परमेश्वरे ।
सर्ग-स्थिति-लयान्यान्ति
बुद्बुदानीव वारिणि ॥ ८ ॥

upādāne'khilādhāre
jaganti parameśvare |
sarga-sthiti-layānyānti
budbudānīva vāriṇi || 8 ||

# आत्मबोधः — ātmabodhaḥ

सच्चिदात्मन्यनुस्यूते
नित्ये विष्णौ प्रकल्पिताः ।
व्यक्तयो विविधास्सर्वा
हाटके कटकादिवत् ॥ ९ ॥

saccidātmany-anusyūte
nitye viṣṇau prakalpitāḥ |
vyaktayo vividhāssarvā
hāṭake kaṭakādivat || 9 ||

यथाकाशो हृषीकेशो
नानोपाधिगतो विभुः ।
तद्भेदाद्भिन्नवद्भाति
तन्नाशे केवलो भवेत् ॥ १० ॥

yathākāśo hṛṣīkeśo
nānopādhigato vibhuḥ |
tadbhedādbhinnavadbhāti
tannāśe kevalo bhavet || 10 ||

नानोपाधिवशादेव
जाति-वर्णाश्रमादयः ।
आत्मन्यारोपितास्तोये
रस-वर्णादि-भेदवत् ॥ ११ ॥

nānopādhivaśādeva
jāti-varṇāśramādayaḥ |
ātmanyāropitāstoye
rasa-varṇādi-bhedavat || 11 ||

पञ्चीकृत-महाभूत-
सम्भवं कर्म-सञ्चितम् ।
शरीरं सुख-दुःखानां
भोगायतनमुच्यते ॥ १२ ॥

pañcīkṛta-mahābhūta-
sambhavaṁ karma-sañcitam |
śarīraṁ sukha-duḥkhānāṁ
bhogāyatanamucyate || 12 ||

पञ्च-प्राण-मनो-बुद्धि-
दशेन्द्रिय-समन्वितम् ।
अपञ्चीकृत-भूतोत्थं
सूक्ष्माङ्गं भोग-साधनम् ॥ १३ ॥

pañca-prāṇa-mano-buddhi-
daśendriya-samanvitam |
apañcīkṛta-bhūtotthaṁ
sūkṣmāṅgaṁ bhoga-sādhanam || 13 ||

अनाद्यविद्यानिर्वाच्या
कारणोपाधिरुच्यते ।
उपाधि-त्रितयादन्यम्
आत्मानमवधारयेत् ॥ १४ ॥

anādy-avidyānirvācyā
kāraṇopādhirucyate |
upādhi-tritayādanyam
ātmānam-avadhārayet || 14 ||

पञ्च-कोशादि-योगेन
तत्तन्मय इव स्थितः ।
शुद्धात्मा नील-वस्त्रादि-
योगेन स्फटिको यथा ॥ १५ ॥

pañca-kośādi-yogena
tattanmaya iva sthitaḥ |
śuddhātmā nīla-vastrādi-
yogena sphaṭiko yathā || 15 ||

वपुस्तुषादिभिः कोशैः
युक्तं युक्त्यावघाततः ।
आत्मानमन्तरं शुद्धं
विविच्यात्तण्डुलं यथा ॥ १६ ॥

vapus-tuṣādibhiḥ kośaiḥ
yuktaṁ yuktyāvaghātataḥ |
ātmānam-antaraṁ śuddhaṁ
vivicyāttaṇḍulaṁ yathā || 16 ||

सदा सर्वगतोऽप्यात्मा
न सर्वत्रावभासते ।
बुद्धावेवावभासेत
स्वच्छेषु प्रतिबिम्बवत् ॥ १७ ॥

sadā sarvagato'pyātmā
na sarvatrāvabhāsate |
buddhāvevāvabhāseta
svaccheṣu pratibimbavat || 17 ||

देहेन्द्रिय-मनो-बुद्धिः
प्रकृतिभ्यो विलक्षणम् ।
तद्वृत्ति-साक्षिणं विद्यात्
आत्मानं राजवत्सदा ॥ १८ ॥

dehendriya-mano-buddhiḥ
prakṛtibhyo vilakṣaṇam |
tadvṛtti-sākṣiṇaṁ vidyāt
ātmānaṁ rājavat-sadā || 18 ||

व्यापृतेष्विन्द्रियेष्वात्मा
व्यापारीवाविवेकिनाम् ।
दृश्यतेऽभ्रेषु धावत्सु
धावन्निव यथा शशी ॥ १९ ॥

vyāpṛteṣvindriyeṣvātmā
vyāpārīvāvivekinām |
dṛśyate'bhreṣu dhāvatsu
dhāvann-iva yathā śaśī || 19 ||

आत्मचैतन्यमाश्रित्य
देहेन्द्रिय-मनो-धियः ।
स्वक्रियार्थेषु वर्तन्ते
सूर्यालोकं यथा जनाः ॥ २० ॥

ātmacaitanyam-āśritya
dehendriya-mano-dhiyaḥ |
svakriyārtheṣu vartante
sūryālokaṁ yathā janāḥ || 20 ||

देहेन्द्रिय-गुणान्कर्माणि
अमले सच्चिदात्मनि ।
अध्यस्यन्त्यविवेकेन
गगने नीलतादिवत् ॥ २१ ॥

dehendriya-guṇān-karmāṇi
amale saccidātmani |
adhyasyanty-avivekena
gagane nīlatādivat || 21 ||

अज्ञानान्मानसोपाधेः
कर्तृत्वादीनि चात्मनि ।
कल्प्यन्तेऽम्बुगते चन्द्रे
चलनादि यथाम्भसः ॥ २२ ॥

ajñānān-mānasopādheḥ
kartṛtvādīni cātmani |
kalpyante'mbugate candre
calanādi yathāmbhasaḥ || 22 ||

रागेच्छा-सुख-दुःखादि
बुद्धौ सत्यां प्रवर्तते ।
सुषुप्तौ नास्ति तन्नाशे
तस्माद्-बुद्धेस्तु नात्मनः ॥ २३ ॥

rāgecchā-sukha-duḥkhādi
buddhau satyāṁ pravartate |
suṣuptau nāsti tannāśe
tasmād-buddhestu nātmanaḥ || 23 ||

प्रकाशोऽर्कस्य तोयस्य
शैत्यमग्नेर्यथोष्णता ।
स्वभावः सच्चिदानन्द-
नित्यनिर्मलतात्मनः ॥ २४ ॥

prakāśo'rkasya toyasya
śaityam-agner-yathoṣṇatā |
svabhāvaḥ saccidānanda-
nitya-nirmalatātmanaḥ || 24 ||

## आत्मबोधः   ātmabodhaḥ

आत्मनः सच्चिदंशश्च
बुद्धेर्वृत्तिरिति द्वयम् ।
संयोज्य चाविवेकेन
जानामीति प्रवर्तते ॥ २५ ॥

ātmanaḥ saccid-aṁśaśca
buddher-vṛttir-iti dvayam |
saṁyojya cāvivekena
jānāmīti pravartate || 25 ||

आत्मनो विक्रिया नास्ति
बुद्धेर्बोधो न जात्विति ।
जीवः सर्वमलं ज्ञात्वा
ज्ञाता द्रष्टेति मुह्यति ॥ २६ ॥

ātmano vikriyā nāsti
buddher-bodho na jātviti |
jīvaḥ sarvamalaṁ jñātvā
jñātā draṣṭeti muhyati || 26 ||

रज्जु-सर्पवदात्मानं
जीवो ज्ञात्वा भयं वहेत् ।
नाहं जीवः परात्मेति
ज्ञातश्चेन्निर्भयो भवेत् ॥ २७ ॥

rajju-sarpavad-ātmānaṁ
jīvo jñātvā bhayaṁ vahet |
nāhaṁ jīvaḥ parātmeti
jñātaścennirbhayo bhavet || 27 ||

आत्मावभासयत्येको
बुद्ध्यादीनीन्द्रियाण्यपि ।
दीपो घटादिवत्स्वात्मा
जडैस्तैर्नावभास्यते ॥ २८ ॥

ātmāvabhāsayatyeko
buddhayādīn-īndriyāṇy-api |
dīpo ghaṭādivat-svātmā
jaḍaistair-nāvabhāsyate || 28 ||

स्वबोधे नान्य-बोधेच्छा
बोधरूपतयात्मनः ।
न दीपस्यान्य-दीपेच्छा
यथा स्वात्म-प्रकाशने ॥ २९ ॥

svabodhe nānya-bodhecchā
bodharūpatayātmanaḥ |
na dīpasyānya-dīpecchā
yathā svātma-prakāśane || 29 ||

निषिध्य निखिलोपाधीन्
नेति नेतीति वाक्यतः ।
विद्यादैक्यं महावाक्यैः
जीवात्म-परमात्मनोः ॥ ३० ॥

niṣidhya nikhilopādhīn
neti netīti vākyataḥ |
vidyādaikyaṁ mahāvākyaiḥ
jīvātma-paramātmanoḥ || 30 ||

आविद्यकं शरीरादि
दृश्यं बुद्बुदवत्क्षरम् ।
एतद्विलक्षणं विद्याद्
अहं ब्रह्मेति निर्मलम् ॥ ३१ ॥

āvidyakaṁ śarīrādi
dṛśyaṁ budbudavat-kṣaram |
etadvilakṣaṇaṁ vidyād
ahaṁ brahmeti nirmalam || 31 ||

देहान्यत्वान्न मे जन्म-
जरा-कार्श्य-लयादयः ।
शब्दादि-विषयैः सङ्गो
निरिन्द्रियतया न च ॥ ३२ ॥

dehānyatvānna me janma-
jarā-kārśya-layādayaḥ |
śabdādi-viṣayaiḥ saṅgo
nirindriyatayā na ca || 32 ||

अमनस्त्वान्न मे दुःख-
राग-द्वेष-भयादयः ।
अप्राणो ह्यमनाः शुभ्रः
इत्यादि श्रुति-शासनात् ॥ ३३ ॥

amanastvānna me duḥkha-
rāga-dveṣa-bhayādayaḥ |
aprāṇo hyamanāḥ śubhraḥ
ityādi śruti-śāsanāt || 33 ||

निर्गुणो निष्क्रियो नित्यो
निर्विकल्पो निरञ्जनः ।
निर्विकारो निराकारो
नित्य-मुक्तोऽस्मि निर्मलः ॥ ३४ ॥

nirguṇo niṣkriyo nityo
nirvikalpo nirañjanaḥ |
nirvikāro nirākāro
nitya-mukto'smi nirmalaḥ || 34 ||

अहमाकाशवत्सर्वं
बहिरन्तर्गतोऽच्युतः ।
सदा सर्वसमश्शुद्धो
निस्सङ्गो निर्मलोऽचलः ॥ ३५ ॥

aham-ākāśavat-sarvaṁ
bahir-antargato'cyutaḥ |
sadā sarvasamaś-śuddho
nissaṅgo nirmalo'calaḥ || 35 ||

नित्य-शुद्ध-विमुक्तैकम्
अखण्डानन्दमद्वयम् ।
सत्यं ज्ञानमनन्तं यत्
परं ब्रह्माहमेव तत् ॥ ३६ ॥

nitya-śuddha-vimuktaikam
akhaṇḍānandam-advayam |
satyaṁ jñānam-anantaṁ yat
paraṁ brahmāham-eva tat || 36 ||

एवं निरन्तराभ्यस्ता
ब्रह्मैवास्मीति वासना ।
हरत्यविद्या-विक्षेपान्
रोगानिव रसायनम् ॥ ३७ ॥

evaṁ nirantarābhyastā
brahmaivāsmīti vāsanā |
haraty-avidyāvikṣepān
rogāniva rasāyanam || 37 ||

विविक्त-देशे आसीनो
विरागो विजितेन्द्रियः ।
भावयेदेकमात्मानं
तमनन्तमनन्यधीः ॥ ३८ ॥

vivikta-deśe āsīno
virāgo vijitendriyaḥ |
bhāvayed-ekam-ātmānaṁ
tam-anantam-ananyadhīḥ || 38 ||

आत्मन्येवाखिलं दृश्यं
प्रविलाप्य धिया सुधीः ।
भावयेदेकमात्मानं
निर्मलाकाशवत्सदा ॥ ३९ ॥

ātmany-evākhilaṁ dṛśyaṁ
pravilāpya dhiyā sudhīḥ |
bhāvayed-ekam-ātmānaṁ
nirmalākāśavat-sadā || 39 ||

रूप-वर्णादिकं सर्वं
विहाय परमार्थवित् ।
परिपूर्ण-चिदानन्द-
स्वरूपेणावतिष्ठते ॥ ४० ॥

rūpa-varṇādikaṁ sarvaṁ
vihāya paramārthavit |
paripūrṇa-cidānanda-
svarūpeṇāvatiṣṭhate || 40 ||

# आत्मबोधः

# ātmabodhaḥ

ज्ञातृ-ज्ञान-ज्ञेय-भेदः
परे नात्मनि विद्यते ।
चिदानन्दैकरूपत्वाद्
दीप्यते स्वयमेव हि ॥ ४१ ॥

jñātṛ-jñāna-jñeya-bhedaḥ
pare nātmani vidyate |
cidānandaika-rūpatvād
dīpyate svayameva hi || 41 ||

एवमात्मारणौ ध्यान-
मथने सततं कृते ।
उदितावगतिर्ज्वाला
सर्वाज्ञानेन्धनं दहेत् ॥ ४२ ॥

evamātmāraṇau dhyāna-
mathane satataṁ kṛte |
uditāvagatir-jvālā
sarvājñānendhanaṁ dahet || 42 ||

अरुणेनेव बोधेन
पूर्वं सन्तमसे हृते ।
तत आविर्भवेदात्मा
स्वयमेवांशुमानिव ॥ ४३ ॥

aruṇeneva bodhena
pūrva santamase hṛte |
tata āvir-bhaved-ātmā
svayam-evāṁśumān-iva || 43 ||

आत्मा तु सततं प्राप्तोऽपि
अप्राप्तवदविद्यया ।
तन्नाशे प्राप्तवद्भाति
स्वकण्ठाभरणं यथा ॥ ४४ ॥

ātmā tu satataṁ prāpto'pi
aprāptavad-avidyayā |
tannāśe prāptavadbhāti
svakaṇṭhābharaṇaṁ yathā || 44 ||

स्थाणौ पुरुषवद्-भ्रान्त्या
कृता ब्रह्मणि जीवता ।
जीवस्य तात्त्विके रूपे
तस्मिन्दृष्टे निवर्तते ॥ ४५ ॥

sthāṇau puruṣavad-bhrāntyā
kṛtā brahmaṇi jīvatā |
jīvasya tāttvike rūpe
tasmin-dṛṣṭe nivartate || 45 ||

तत्त्वस्वरूपानुभवात्
उत्पन्नं ज्ञानमञ्जसा ।
अहं ममेति चाज्ञानं
बाधते दिग्भ्रमादिवत् ॥ ४६ ॥

tattvasvarūpānubhavāt
utpannaṁ jñānamañjasā |
ahaṁ mameti cājñānaṁ
bādhate digbhramādivat || 46 ||

सम्यक् विज्ञानवान् योगी
स्वात्मन्येवाखिलं जगत् ।
एकं च सर्वमात्मानं
ईक्षते ज्ञानचक्षुषा ॥ ४७ ॥

samyak vijñānavān yogī
svātmanyevākhilaṁ jagat |
ekaṁ ca sarvamātmānaṁ
īkṣate jñānacakṣuṣā || 47 ||

आत्मैवेदं जगत्सर्वं
आत्मनोऽन्यन्न विद्यते ।
मृदो यद्वद्घटादीनि
स्वात्मानं सर्वमीक्षते ॥ ४८ ॥

ātmaivedaṁ jagatsarvaṁ
ātmano'nyanna vidyate |
mṛdo yadvadghaṭādīni
svātmānaṁ sarvam-īkṣate || 48 ||

जीवन्मुक्तस्तु तद्विद्वान्
पूर्वोपाधि-गुणांस्त्यजेत् ।
सच्चिदानन्दरूपत्वात्
भवेद् भ्रमर-कीटवत् ॥ ४९ ॥

jīvan-muktastu tadvidvān
pūrvopādhi-guṇāṁs-tyajet |
saccidānandarūpatvāt
bhaved bhramara-kīṭavat || 49 ||

तीर्त्वा मोहार्णवं हत्वा
रागद्वेषादि-राक्षसान् ।
योगी शान्ति-समायुक्तः
आत्मारामो विराजते ॥ ५० ॥

tīrtvā mohārṇavaṁ hatvā
rāga-dveṣādi-rākṣasān |
yogī śānti-samāyuktaḥ
ātmārāmo virājate || 50 ||

बाह्य-नित्य-सुखासक्तिं
हित्वात्म-सुख-निर्वृतः ।
घटस्थ-दीपवत्स्वस्थः
स्वान्तरेव प्रकाशते ॥ ५१ ॥

bāhya-nitya-sukhāsaktiṁ
hitvātma-sukha-nirvṛtaḥ |
ghaṭastha-dīpavat-svasthaḥ
svāntareva prakāśate || 51 ||

उपाधिस्थोऽपि तद्धर्मैः
अलिप्तो व्योमवन्मुनिः ।
सर्वविन्मूढवत्तिष्ठेत्
असक्तो वायुवच्चरेत् ॥ ५२ ॥

upādhistho'pi taddharmaiḥ
alipto vyomavan-muniḥ |
sarvavin-mūḍhavattiṣṭhet
asakto vāyuvac-caret || 52 ||

उपाधि-विलयाद्विष्णौ
निर्विशेषं विशेन्मुनिः ।
जले जलं वियद्व्योम्नि
तेजस्तेजसि वा यथा ॥ ५३ ॥

upādhi-vilayādviṣṇau
nirviśeṣaṁ viśen-muniḥ |
jale jalaṁ viyadvyomni
tejastejasi vā yathā || 53 ||

यल्लाभान्नापरो लाभो
यत्सुखान्नापरं सुखम् ।
यज्ज्ञानान्नापरं ज्ञानं
तद्-ब्रह्मेत्यवधारयेत् ॥ ५४ ॥

yallābhānnāparo lābho
yatsukhānnāparaṁ sukham |
yajjñānānnāparaṁ jñānaṁ
tad-brahmety-avadhārayet || 54 ||

यद्-दृष्ट्वा नापरं दृश्यं
यद्-भूत्वा न पुनर्भवः ।
यज्ज्ञात्वा नापरं ज्ञेयं
तद्-ब्रह्मेत्यवधारयेत् ॥ ५५ ॥

yad-dṛṣṭvā nāparaṁ dṛśyaṁ
yad-bhūtvā na punar-bhavaḥ |
yajjñātvā nāparaṁ jñeyaṁ
tad-brahmety-avadhārayet || 55 ||

तिर्यगूर्ध्वमधः पूर्णं
सच्चिदानन्दमद्वयम् ।
अनन्तं नित्यमेकं यद्
तद्-ब्रह्मेत्यवधारयेत् ॥ ५६ ॥

tiryag-ūrdhvam-adhaḥ pūrṇaṁ
saccidānandam-advayam |
anantaṁ nityam-ekaṁ yad
tad-brahmety-avadhārayet || 56 ||

अतद्व्यावृत्ति-रूपेण
वेदान्तैर्लक्ष्यतेऽद्वयम् ।
अखण्डानन्दमेकं यद्
तद्-ब्रह्मेत्यवधारयेत् ॥ ५७ ॥

atadvayāvṛtti-rūpeṇa
vedāntairlakṣyate'dvayam ।
akhaṇḍānandam-ekaṁ yad
tad-brahmety-avadhārayet ॥ 57 ॥

अखण्डानन्द-रूपस्य
तस्यानन्द-लवाश्रिताः ।
ब्रह्माद्यास्तारतम्येन
भवन्त्यानन्दिनोऽखिलाः ॥ ५८ ॥

akhaṇḍaananda-rūpasya
tasyānanda-lavāśritāḥ ।
brahmādyās-tāratamyena
bhavanty-ānandino'khilāḥ ॥ 58 ॥

तद्युक्तमखिलं वस्तु
व्यवहारस्तदन्वितः ।
तस्मात्सर्वगतं ब्रह्म
क्षीरे सर्पिरिवाखिले ॥ ५९ ॥

tadyuktama-khilaṁvastu
vyavahāras-tadanvitaḥ ।
tasmāt-sarvagataṁ brahma
kṣīre sarpirivākhile ॥ 59 ॥

अनण्वस्थूलमह्रस्वम्-
अदीर्घमजमव्ययम् ।
अरूपगुणवर्णाख्यं
तद्-ब्रह्मेत्यवधारयेत् ॥ ६० ॥

anaṇv-asthūlam-ahrasvam-
adīrgham-ajam-avyayam ।
arūpa-guṇa-varṇākhyaṁ
tad-brahmety-avadhārayet ॥ 60 ॥

यद्भासा भास्यतेऽर्कादि
भास्यैर्यत्तु न भास्यते ।
येन सर्वमिदं भाति
तद्-ब्रह्मेत्यवधारयेत् ॥ ६१ ॥

yadbhāsā bhāsyate'rkādi
bhāsyairyattu na bhāsyate ।
yena sarvam-idaṁ bhāti
tad-brahmety-avadhārayet ॥ 61 ॥

स्वयमन्तर्बहिर्व्याप्य
भासयन्नखिलं जगत् ।
ब्रह्म प्रकाशते वह्नि-
प्रतप्तायसपिण्डवत् ॥ ६२ ॥

svayamantarbahirvyāpya
bhāsayannakhilaṁ jagat ।
brahma prakāśate vahni-
prataptāyasapiṇḍavat ॥ 62 ॥

जगद्विलक्षणं ब्रह्म
ब्रह्मणोऽन्यन्न किञ्चन ।
ब्रह्मान्यद्भाति चेन्मिथ्या
यथा मरुमरीचिका ॥ ६३ ॥

jagadvalakṣaṇaṁ brahma
brahmaṇo'nyanna kiñcana ।
brahmānyadbhāti cen-mithyā
yathā marumarīcikā ॥ 63 ॥

दृश्यते श्रूयते यद्यद्
ब्रह्मणोऽन्यन्न तद्भवेत् ।
तत्त्वज्ञानाच्च तद्ब्रह्म
सच्चिदानन्दमद्वयम् ॥ ६४ ॥

dṛśyate śrūyate yadyad
brahmaṇo'nyanna tadbhavet ।
tattva-jñānācca tad-brahma
saccidānandam-advayam ॥ 64 ॥

सर्वगं सच्चिदात्मानं
ज्ञान-चक्षुर्निरीक्षते ।
अज्ञान-चक्षुर्नेक्षेत
भास्वन्तं भानुमन्धवत् ॥ ६५ ॥

sarvagaṁ saccidātmānaṁ
jñāna-cakṣur-nirīkṣate |
ajñāna-cakṣur-nekṣeta
bhāsvantaṁ bhānum-andhavat || 65 ||

श्रवणादिभिरुद्दीप्त
ज्ञानाग्नि-परितापितः ।
जीवस्सर्वमलान्मुक्तः
स्वर्णवद्-द्योतते स्वयम् ॥ ६६ ॥

śravaṇādibhiruddīpta
jñānāgni-paritāpitaḥ |
jīvassarvamalān-muktaḥ
svarṇavad-dyotate svayam || 66 ||

हृदाकाशोदितो ह्यात्मा
बोधभानुस्तमोऽपहृत् ।
सर्वव्यापी सर्वधारी
भाति भासयतेऽखिलम् ॥ ६७ ॥

hṛdākāśodito hyātmā
bodhabhānus-tamo'pahṛt |
sarvavyāpī sarvadhārī
bhāti bhāsayate'khilam || 67 ||

दिग्देश-कालाद्यनपेक्ष्य सर्वगं
शीतादिहृन्नित्य-सुखं निरञ्जनम् ।
यस्स्वात्म-तीर्थं भजते विनिष्क्रियः
स सर्ववित्सर्वगतोऽमृतो भवेत् ॥ ६८ ॥

digdeśa-kālādyanapekṣya sarvagaṁ
śītādihṛnnitya-sukhaṁ nirañjanam |
yassvātma-tīrthaṁ bhajate viniṣkriyaḥ
sa sarvavit-sarvagato'mṛto bhavet || 68 ||

॥ इत्यात्मबोधः समाप्तः ॥

|| ity-ātmabodhaḥ samāptaḥ ||